# वैयाकरणनैयायिकमीमांसकमतेषु तिङर्थविचारः।

Dr. Seema V. Madhavan
Contract Lecturer, Dept. of Vyakarana,
SSUS, Kalady, Mob: 9349789819

शब्द्यतेइतिशब्दः।शब्दस्यइदंशाब्दम्।शाब्दस्यअर्थबोधःशाब्दबोधःअथवाअर्थबोधः। शाब्दबोधविचारविषये मीमांसान्यायव्याकरणसम्प्रदायेषु मतभेदः वर्तते। अद्यतनकालेऽपि दार्शनिकानां चिन्तापद्धतिषु शाब्दबोधविचारः प्राधान्येनास्थितः। अस्मिन् विषये भारतीयदर्शनेषु प्रधानाः त्रिविधाः मतभेदाः सन्ति । ते तु - वैयाकरणानां धात्वर्थव्यापारमुख्यविशेष्यकः शाब्दबोधः, मीमांसकानां आख्यातार्थमुख्यविशेष्यकः शाब्दबोधः, नैयायिकानां प्रथमान्तार्थमुख्यविशेष्यकःशाब्दबोधः चेति। अत्र वैयाकरणनैयायिकमीमांसकमतेषु तिङर्थविचारः क्रियते।

**वैयाकरणमते तिङर्थविचारः।**

व्याकरणशास्त्रे धातुसंज्ञा 'भूवादयो धातवः' इति सूत्रेण उच्यते। क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः इत्यर्थः। अथवा, भूप्रभृतयो वा सदृशा ये ते धातुसंज्ञाः इत्यर्थः। फलव्यापारौ धातुवाच्यौ इति वैयाकरणमतेन उच्यते। तयोः मध्ये फलजनकत्वात् व्यापारः प्रधानम्। फलाश्रयः कर्म, व्यापाराश्रयः कर्ता च तिङर्थौ। वैयाकरणभूषणसारे कौण्डभट्टः धात्वर्थनिर्णये कारिकारूपेण एवं वदति ।

'फलव्यापारयोर्धातुराश्रये तु तिङःस्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।।'

एवं फलं व्यापारश्चेति धातोः द्वावर्थौ स्तः। तिङर्थः आश्रयः भवति। फलाश्रयः कर्म, व्यापाराश्रयः कर्ता च भवति। फले प्रधानं व्यापारः, तिङर्थः विशेषणं च अस्ति। फलव्यापारयोः धातुः स्मृतः। स्मृतः इति एकवचनत्वेन विपरिणम्यते। तिङः इति प्रथमा बहुवचनं पदम्। स्मृताः इति पदमपि साहचर्ये बहुवचनं भवति। धातुः प्रथमा एकवचनं इत्यनेन स्मृतः इति एकवचनत्वेन विपरिणम्यते।

फलव्यापारयोः इति इतरेतरद्वन्द्वसमासेन व्यापारे फले च पृथक् शक्तिः सिध्यति। कर्तृवाच्यक्रियायां व्यापारस्य कर्मवाच्यक्रियायां फलस्य च प्राधान्यम्। अर्थात् फलोद्देशक व्यापारविधये व्यापारोद्देशकफलविधये च पृथग् बोध्यः। यथा 'पचति' इत्यादौ तिङन्ते प्रकृतिः पच्धातुः प्रत्ययश्च तिङ् पच् धातोः विक्लित्तिरूपं फलं तदनुकूलं व्यापारं च बोधयति। एवं च पच्धातोः अर्थः विक्लित्त्यनुकूलव्यापारः इति।

फलानुकूलो व्यापारो धात्वर्थौ यत्नसंमितः

फलं धात्वर्थजन्यं हि व्यापारस्तस्य बाधकः।।

इति परमलघुमञ्जूषायां उक्तम्। तिङन्ते धातुः प्रत्ययः चेति द्विधा भवति। तत्र धातोः फलं व्यापारश्च अर्थः। प्रत्ययस्य कालः , संख्या, कर्ता, कर्म च अर्थाः भवन्ति। फले प्रधानं व्यापारः तिङर्थस्तु विशेषणं इति कारिकांशेन व्याकरणदर्शने प्रतिपादितं सिद्धान्तद्वयं बोधयति। प्रथमं सिद्धान्ते 'फलापेक्षया व्यापारः' प्रधानं भवति इत्युच्यते। अन्यसिद्धान्तस्तु तिङ अर्थः न विशेष्यम् इति।

प्रथमसिद्धान्तस्य अर्थस्तु 'फलानुकूलव्यापारः धात्वर्थः' न व्यापारजन्यफलम् इति। द्वितीयसिद्धान्तस्य अर्थो भवति तिङर्थः विशेषणम् इति। अर्थात् कर्ता, कर्म, संख्या, कालः च । तत्र कर्तृकर्माणी फलव्यापारयोः विशेषणे भवतः । संख्या- कर्तृप्रत्यये कर्तरि कर्मप्रत्यये कर्मणि च विशेषणं भवति। यतः कर्तृप्रत्यये कर्ता, कर्मप्रत्यये कर्म च संख्यां बोधयति। शाब्दबोध प्रयोगाः त्रिधा भवन्ति - कर्तरि, कर्मणि, भावे च।

अत्र कर्तरि प्रयोगे- 'देवदत्तः ओदनं पचति' इति वाक्ये देवदत्तः कर्ता , ओदनं कर्म च भवति। पचति इत्यत्र पच् धातुः तिप्रत्ययः इति द्वौ अंशौ स्तः। धातोः फलव्यापारौ अर्थौ। तिप्रत्ययस्य कर्ता संख्या, कालश्च अर्थाः भवन्ति। पच्धातोः विक्लित्तिरूपं फलं, व्यापारः तदनुकूलश्च अर्थः। व्यापारस्य प्राधान्यात् शाब्दबोधः एवं भवति यथा, 'देवदत्ताभिन्नैककर्तृक वर्तमानकालिक ओदनकर्मक विक्लित्त्यनुकूलो व्यापारः' इति शाब्दबोधः।

'देवदत्तेन ओदनं पच्यत' इति वाक्ये देवदत्तेन इति कर्ता, ओदनः कर्म, पच्यते इति क्रिया च भवन्ति। ते प्रत्ययस्य कर्म संख्या कालः अर्थाः। अत्र फलाश्रयकर्मणः प्रधानत्वात् पच् धातोः व्यापारजन्यविक्लित्तिः इत्यर्थः। शाब्दबोधः यथा-देवदत्तवृत्तिः वर्तमानकालिक व्यापारजन्य ओदननिष्ठा विक्लित्तिः इति। अत्र भावे प्रयोगे- भूयते इति। भूधातोः तिङ्प्रत्ययः च। तिङ्प्रत्ययस्य भाव, कालौ अर्थौ स्तः।

'पचति भवति' नाम पाकं करोति इत्यर्थः। पाचकः एव पाकं करोति। अत्र कर्तुः अनुक्तत्वात् पचति इति क्रिया कर्तृरूपेण अन्वेति। भवति इत्यस्य भवनानुकूलव्यापारः इत्यर्थः।

अत्र 'देवदत्तः तण्डुलं पचति' इत्यत्र देवदत्ताभिन्नैककर्तृक तण्डुलाभिन्नैककर्मक विक्लित्त्यनुकूलो वर्तमानकालिको व्यापारः पचति इत्यत्र कर्तृप्रत्ययदर्शनात् व्यापारमुख्यविशेष्यकः शाब्दबोधः। एवं च आख्यातार्थसंख्याप्रकारकबोधे विशेष्यता संबन्धेन आख्यातजन्यकर्तृकर्मणोः उपस्थितिः हेतुरिति कार्यकारणभावः फलितः। नैयायिकास्तु फलव्यापारौ धात्वर्थः, आख्यातार्थः कृतिः प्रथमान्तमुख्यविशेष्यकश्च शाब्दबोधः इत्यामनन्ति। तण्डुलवृत्तिः या विक्लित्तिः तदनुकूलव्यापारानुकूलकृतिमान् देवदत्तः। परं च तादृश कार्यकारणभावस्वीकारे 'चन्द्र इव मुखं दृश्यते'। 'देवदत्तः भुक्त्वा व्रजति' इत्यादौ चन्द्रादेः अपि प्रथमान्तार्थतया तत्रापि आख्यातार्थसंख्याया अन्वयापत्तिः। एवं च 'पश्य मृगो धावति' इत्यादौ कर्मत्वापत्तिः प्रथमान्तसामानाधिकरण्ये शतृप्रत्ययापत्तिश्च।

अत्र वैयाकरणशाब्दबोधे क्रिया साध्याक्रिया, सिद्धाक्रिया इति द्विधा विभज्यते। क्रियान्तराकाङ्क्षा अनुत्थापकता अवच्छेदकरूपवत्त्वं साध्यत्वं पचति इत्यादौ। 'पाकः' इत्युक्ते सति भवति अभूत् भविष्यति वा इत्यादि आकाङ्क्षा सञ्जायते तत् सिद्धक्रिया भवति। एवं साध्यत्वं असत्वभूतत्वं च पर्यायौ स्तः।'असत्वभूतो भावश्च तिङ्पदैरभिधीयते'-इति वाक्यपदीये उक्तम्। असत्वभूता क्रिया एव तिङ्प्रत्ययेनभिधीयते इत्यर्थः। यदि 'पचति'इत्युक्ते फूत्कारादि अनेकेषां अर्थानां प्रकटीकरणं भवति तर्हि, नानार्थकतापत्तिः इति चेत् न। यतो हि वाक्यपदीये उक्तं च 'गुणभूतैरवयवैः समूहः क्रमजन्मनाम् बुध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते' इति।

गुणीभूतावयवानां द्वारा क्रमशः उत्पाद्यमानफूत्कारादि व्यापाराणां समूहः, यत्र च समूहावलम्बनात्मकबुद्धिद्वारा अभेदकल्पना कृता स्यात्, तादृशबुद्धिपरिकल्पितसमूहः क्रिया इति।

**मीमांसकमते तिङर्थविचारः।**

मीमांसकमते भावनामुख्यविशेष्यक शाब्दबोधः अङ्गीक्रियते । अत्र कर्तृनिष्ठा विशेषः भावना भवति। तत् भवितुः भवनानुकूलः भावयितुः व्यापारविशेषः इति। आख्यातार्थः भावना इत्युच्यते। तत् धात्वर्थः अथवा तिप्रत्ययस्य अर्थो भवति। धात्वर्थः फलं च प्रत्ययार्थः भावना च मीमांसकमतेन उच्यते। यथा ' देवदत्तः ओदनं पचति' इति वाक्ये देवदत्तकर्तृक ओदनकर्मक विक्लित्त्यनकूलभावना इत्यर्थःविवक्षितः।

भावना द्विविधा भवति। शाब्दीभावना,आर्थीभावना चेति। तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुः व्यापारविशेषः शाब्दीभावना भवति। सा च लिंङ्शेन उच्यते। लिङ्श्रवणे अयं मां प्रवर्तयति मत्प्रवृत्त्यनुकूलव्यापारवान् अयमिति नियमेन प्रतीतेः। यद्यस्मात् शब्दात् नियमतः प्रतीयते तत् तस्य वाच्यम्। यथा 'गामानय' इत्यस्मिन् वाक्ये गोशब्दस्य गोत्वम्। शब्दे

लौकिकवैदिकभेदौ स्तः। स च व्यापारविशेषे लौकिकवाक्ये पुरुषनिष्ठः अभिप्रायविशेषः। वैदिकवाक्ये तु पुरुषाभावात् लिङ्गादिशब्दनिष्ठैव अत एव शब्दीभावना इति व्यवह्रियते।

शाब्दीभावनायाः अंशत्रयमस्ति - साध्यं, साधनं, इतिकर्तव्यता चेति। ताः च किं भावयेत्, केन भावयेत्, कथम् भावयेत् इति। तत्र साध्यत्वेन अन्वेति एकप्रत्ययगम्यत्वेन समानाभिधाश्रुतेः। संख्यादीनां एकप्रत्ययगम्यत्वेऽपि अयोग्यत्वात् न साध्यत्वेन अन्वयः। साधनाकाङ्क्षायां लिङादिज्ञानं कारणत्वेन अन्वेति। तस्य च करणत्वम् न भावनोत्पादकत्वेन, तत्पूर्वमपि तस्याः शब्दे सत्वात्। किन्तु भावनाज्ञापकत्वेन शब्दभावनाभाव्य निवर्तकत्वेन वा। इतिकर्तव्यताकांक्षायां अप्राशस्त्यम् इतिकर्तव्यतात्वेन अन्वेति यथा, 'वायव्यं श्वेतमालभेत भूतिकामः'। वायुर्वै क्षेपिष्ठा इत्यर्थः।

प्रयोजनेच्छाजनकक्रियाविशेषः आर्थीभावना। सा च आख्यातत्वांशेन उच्यते आख्यात सामान्यस्य व्यापारवाचित्वात्। अर्थीभावनायाः अंशत्रयमस्ति। साध्यं साधनं, इतिकर्तव्यता चेति। ताः च किं भावयेत्, केन भावयेत्, कथं भवयेत् इति। अत्र देवदत्तः ओदनं पचति इति वाक्ये ओदनं साध्यं भवति। साधनं करणांशं भवति। अस्मिन् उदाहरणे पाकक्रिया साधनं भवति। स्थाली पचति इति इतिकर्तव्यता। अधिश्रयणादारभ्य अधः श्रयणपर्यन्तः,इतिकर्तव्यता। तत् अवान्तरव्यापारम् । वैदिकयागादिकर्मे स्वर्गादिफलं साध्यं, यागाधिकरणं साधनं, पाकयज्ञं यागेन स्वर्गं भावयेत् इति इतिकर्तव्यता। मीमांसकमते 'देवदत्तः ओदनं पचति' इति वाक्यस्य शब्दबोधः एवं उच्यते- देवदत्तकर्तृक ओदनकर्मक विक्लित्त्यनुकूलो व्यापारानुकूलो भावनाइति।

शाब्दीभावनायाः फलं पुरुषप्रवृत्तिः भवति। पुरुषप्रवृत्तिः आर्थीभावना इत्युच्यते। अतः शाब्दीभावनायाः फलं अर्थीभावना भवति। वाक्यार्थज्ञानं शब्दज्ञानं भवति। तत्करणं तु शब्दः।

## नैयायिकमते तिङर्थविचारः।

नैयायिकाः प्रथमान्तपदमुख्यविशेष्यकशाब्दबोधं अङ्गीकुर्वन्ति। अत्र देवदत्तः तण्डुलं पचति इति वाक्ये देवदत्तः इति प्रथमान्तं पदं भवति। देवदत्तः इति पदं कर्तृत्वः विशिष्टः,एकत्वविशिष्टः च भवति। पचति इति क्रियापदं भवति। अत्र क्रियांशे धात्वंशः , प्रत्ययांशः इति द्वे अंशौ स्तः। धात्वंशे फलं, व्यापारं च द्वे अंशौ भवतः । ति इति प्रत्ययः। नैयायिकमते ति इत्यस्य कृति इत्यर्थः भवति। कर्तृनिष्ठव्यापारः कृतिः इत्युच्यते। फलाश्रयं कर्म च भवति। कर्ता व्यापाराश्रयः अस्ति। फलानुकूलः व्यापारः भवति। अत्र व्यापारानुकूलः कृतिः च भवति।

कृतिः व्यापार च अन्योन्यं अनुकूलतया संबद्धौ। 'देवदत्तः तण्डुलं पचति' इति वाक्यस्य शाब्दबोधः एवं भवति 'तण्डुलकर्मक पचनानुकूलकृतिमान् एकत्वविशिष्टः देवदत्तः' इति।

## उपसंहारः

वैयाकरणमीमांसकनैयायिकमतेषु शाब्दबोधः विभिन्नरीत्या वर्णितोऽस्ति। वैयाकरणः धात्वर्थमुख्यविशेष्यकः शाब्दबोधं अङ्गीक्रियते। तत्र फलं, व्यापारः च धातोः अर्थो भवति इत्येवं कथ्यते। मीमांसकैः भावनामुख्यविशेष्यकः शब्दबोधः उच्यते। अत्र कर्तृनिष्ठाविशेषः भावना भवति। एवं शाब्दबोधः भावनयैव उच्यते। नैयायिकाः प्रथमान्तपदार्थमुख्यविशेष्यक शाब्दबोधं अङ्गीकुर्वन्ति। प्रथमान्तपदप्रधानः शाब्दबोधे क्रियांशे, धात्वंशः, प्रत्ययांशः इति अर्थौ उच्यते। एवं च वैयाकरणनैयायिक मीमांसकमतेषु तिङर्थस्य प्राधान्यं सुतरां दर्शयितुं शक्यम्।

**सहायकग्रन्थाः -**


१) वैयाकरणभूषणसारः कौण्डभट्टः। व्याख्याकारः डॉ आद्याप्रसादमिश्र, प्रकाशकः, डॉ हरिश्चन्द्रमणित्रिपाठी। सम्पूर्णानन्दसं स्कृतविश्वविद्यालयः वाराणसी।

2) Sabdhabodha mimamsa - Part I, N.S. Ramanuja Tatacharya, Rashtriya Sanskrit Samsthan, New Delhi, 2006.

३) वैयाकरणभूषणसारः - कौण्डभट्टः प्रभाकरमिश्रः, चौखम्भा विद्याभवन, वाराणसी, २००६ कमला व्याख्या च।

४) परमलघुमञ्जूषा - व्या. लोकमणिदाहालः, चौखम्भा सुरभारती प्रकाशन, वाराणसी, २००३।


* * *